श्रीः ।

समासचक्रम् ।

इदं पुस्तकं

हरिप्रसाद भगीरथजी

इत्यनेन

मुंबय्यां

"जगदीश्वर" यन्त्रालये

मुद्रितम्

आश्विन शुक्ल ११ संवत १९५८ सन् १९०१.

श्रीः ।

श्रीवेङ्कटेश्वरायनमः ।

समासचक्रम् ।

॥ श्रीगणेशाय नमः ॥ ॥ षोढा समासाः संक्षेपादष्टाविंशतिधा पुनः ॥ नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा ॥१॥ तत्राष्टधा तत्पुरुषःसप्तधा कर्मधारयः ॥ सप्तधा च बहुव्रीहिर्द्विगुराभाषितो द्विधा ॥ २ ॥ द्वंद्वोऽपि द्विविधो ज्ञेयोऽव्ययीभावो द्विधा मतः ॥ तेषां पुनः समासानां प्राधान्यं स्याच्चतुर्विधम् ॥ ३ ॥ चकारबहुलो द्वंद्वः सचासौ कर्मधारयः ॥ यस्ययेषांबहुव्रीहिः शेषस्तत्पुरुषःस्मृतः ॥ ४ ॥ कर्तृकर्मक्रियायुक्तः प्रयोगः स्यात्सकर्मकः ॥ अकर्मकः कर्मशून्यः कर्मद्वन्द्वो

द्विकर्मकः ॥ ५ ॥ अथ बालबोधार्थं प्रयोग-
विधिः कथ्यते ॥ प्रयोगाः पंचविधाः ॥ सक-
र्मकोऽकर्मकः कर्मणि भावे द्विकर्मकश्चेति
भेदात् ॥ सकर्मकप्रयोगो यथा ॥ कृष्णो भ-
क्तान् रक्षति ॥ १ ॥ अकर्मकप्रयोगोयथा ॥
कृष्णस्तिष्ठति ॥ २ ॥ कर्मणिप्रयोगो यथा ॥
विष्णुना प्रपंचःक्रियते ॥ ३ ॥ भावे प्रयोगो
यथा ॥ कृष्णेन स्थीयते ॥४॥ द्विकर्मकप्रयो-
गो यथा ॥ यो धरामन्नं दुदोह ॥ ५ ॥ इति प्र-
योगविधिः ॥ अथ समासविधिः कथ्यते ॥
समासाः षड्विधाः तत्पुरुषः कर्मधारयो ब-
हुव्रीहिर्द्विगुर्द्वंद्वोऽव्ययीभावश्चेति भेदात् ॥
तल्लक्षणानि तु ॥ पूर्वपदार्थप्रधानोऽव्ययीभा-
वः ॥ उत्तरपदार्थप्रधानस्तत्पुरुषः ॥ उभयप-
दार्थप्रधानो द्वंद्वः ॥ अन्यपदार्थप्रधानो बहु-

ब्रीहिः ॥ द्विगुकर्मधारयौ तत्पुरुषभेदौ॥ समा-
सार्थावबोधकं वाक्यं विग्रह इति ॥ तत्राष्टधा
तत्पुरुषक्रमः ॥ प्रथमातत्पुरुषो द्वितीयातत्पु-
रुषस्तृतीयातत्पुरुषश्चतुर्थीतत्पुरुषःपंचमीत-
त्पुरुषः षष्ठीतत्पुरुषः सप्तमीतत्पुरुषो नञ्त-
त्पुरुषश्चेति ॥ तत्र प्रथमातत्पुरुषो यथा ॥
अर्धं पिप्पल्याः अर्धपिप्पली ॥ पूर्वं कायस्ये-
ति पूर्वकायः ॥ १ ॥ द्वितीयातत्पुरुषो यथा॥
कृष्णं श्रितः कृष्णश्रितः ॥ ग्रामं गतो ग्राम-
गतः ॥ कांतारमतीतः कांतारातीतः ॥ २ ॥
तृतीयातत्पुरुषो यथा ॥ शंकुलया खंडः शंकु-
लाखंडः धान्येनार्थो धान्यार्थः ॥ मासेन
पूर्वो मासपूर्वः ॥ ३॥ चतुर्थीतत्पुरुषो यथा॥
यूपाय दारु यूपदारु ॥ कुंडलायहिरण्यं कुंडल-
हिरण्यम् गुरवे दक्षिणा गुरुदक्षिणा ॥ ४ ॥

पंचमीतत्पुरुषो यथा ॥ अर्थात् अपेतःअर्था-
पेतः ॥ सिंहात् भयं सिंहभयम् ॥ वृश्चिका-
त् भीः वृश्चिकभीः ॥ ५ ॥ षष्ठीतत्पुरुषो य-
था ॥ कृष्णस्य भक्तः कृष्णभक्तः ॥ आम्रस्य
फलं आम्रफलम् ॥ राज्ञः पुरुषो राजपुरुषः ॥
॥ ६ ॥ सप्तमीतत्पुरुषो यथा ॥ अक्षेषु शौंडः
अक्षशौंडः ॥ कर्मणि कुशलः कर्मकुशलः ॥
विद्यायां निपुणः विद्यानिपुणः ॥ ७ ॥ नञ्त-
त्पुरुषो यथा ॥ न ब्राह्मणः अब्राह्मणः ॥
न वृषभः अवृषभः ॥ पापाभावः अपापम् ॥
धर्मविरुद्धोऽधर्मः ॥८॥ इति तत्पुरुषः॥अथ
कर्मधारयः कथ्यते ॥ स च विशेषणपूर्वपदो
विशेष्यपूर्वपदोविशेषणोभयपद उपमानपूर्व-
पदउपमानोत्तरपदः संभावनापूर्वपदोऽवधा-
रणापूर्वपदश्चेति भेदात्सप्तविधः ॥ तत्र विशेष-

णपूर्वपदःकर्मधारयो यथा ॥ कृष्णश्वासौसर्प-श्च कृष्णसर्पः ॥ कृष्णौ च तौ सर्पौ च कृष्ण-सर्पौ ॥ कृष्णाश्च ते सर्पाश्च कृष्णसर्पाः॥ रक्ता चासौ लता च रक्तलता ॥ रक्ते च ते लते च रक्तलते ॥ रक्ताश्चताः लताश्च रक्तलताः ॥ नीलं च तत् उत्पलं च नीलोत्पलम् ॥ नीले च ते उत्पले च नीलोत्पले ॥ नीलानि च तानि उत्पलानि च नीलोत्पलानि ॥ १ ॥ विशेष्यपूर्वपदः कर्मधारयो यथा ॥ वैयाक-रणश्चासौ खसूचिश्च वैयाकरणखसूचिः ॥ गोपालश्चासौ बालश्च गोपालबालः ॥ २ ॥ विशेषणोभयपदः कर्मधारयो यथा ॥ शीतं च तत् उष्णं च शीतोष्णम् ॥ ३ ॥ उपमा-नपूर्वपदः कर्मधारयो यथा ॥ मेघ इव श्या-मो मेघश्यामः कंबुवत् ग्रीवा कंबुग्रीवा ॥ चंद्रवत् मुखं चंद्रमुखम् ॥ ४ ॥ उपमानोत्तरप-

दः कर्मधारयो यथा॥ पुरुषःव्याघ्र इव पुरुष-
व्याघ्रः नरः सिंह इव नरसिंहः ॥ ५ ॥ सं-
भावनापूर्वपदः कर्मधारयो यथा॥ गुणः इति
बुद्धिः गुणबुद्धिः ॥ ६ ॥ अवधारणापूर्वपदः
कर्मधारयो यथा॥ विद्यैव धनं विद्याधनम् ॥
अविद्यैव शृंखला अविद्याशृंखला॥ ७ ॥ म-
ध्यमपदलोपी समासो यथा ॥ शाकप्रियः
पार्थिवः शाकपार्थिवः ॥ देवपूजको ब्राह्मणः
देवब्राह्मणः॥इति कर्मधारयः अथ बहुव्रीहिः
कथ्यते ॥ सच द्विपदो बहुपदः सहपूर्वपदः
संख्योत्तरपदः संख्योभयपदोव्यतिहारलक्ष-
णो दिगंतराललक्षणश्चेतिभेदात्सप्तविधः ॥
तत्र द्विपदबहुव्रीहिर्यथा॥ चित्राः गावो यस्य
सः चित्रगुःगोपः ॥ प्राप्तं उदकं यं सः प्राप्तो-
दको ग्रामः॥ भुक्तं ओदनं येनसः भुक्तौदनो-

भूपः ॥ निर्जितः कामो येन सः निर्जित-
कामः शिवः ॥ विभक्तं धनं यैस्ते विभक्त-
धनाःबंधवः॥ दत्तः सूपो यस्मै सः दत्तसूपो
ब्राह्मणःउद्धृतं धनं यस्मात्तत् उद्धृतधनं कुंडम्
॥ चक्रं पाणौ यस्य सः चक्रपाणिः हरिः॥ कर-
स्थितं धनं यस्य सः करस्थितधनो वणिक् ॥
पुष्पिताःद्रुमाःयस्मिन् सः पुष्पितद्रुम आरा-
मः ॥ बहवो यज्वानो यस्यां सा बहुयज्वा
शाला ॥ पुष्पिताःद्रुमाः यस्मिन् तत् पुष्पि-
तद्रुमं वनम् ॥ खरस्य मुखमिव मुखं यस्य
सः खरमुखस्तुरगः ॥ उष्ट्रस्य मुखमिव मुखं
यस्य सः उष्ट्रमुखो यक्षः ॥ उच्चर्घटो यस्याःसा
उच्चैर्घटा नारी ॥ अंगगात्रोदरस्तनकंठौष्ठदं-
तमुखाक्षिकेशाः स्त्रियां बहुव्रीहौ ईबंता भवं-
ति ॥ ते च यथा ॥ सुंदरं अंगं यस्याः सा सुं-
दरांगी ॥ शोभनं गात्रं यस्याः सा सुगात्री ॥

कृशं उदरं यस्याःसा कृशोदरी ॥ चारू स्त-
नौ यस्याः सा चारुस्तनी ॥ इंदीवरे इव
अक्षिणी यस्याः सा इंदीवराक्षी ॥ कंबुरिव
कंठो यस्याःसा कंबुकंठी ॥ कुटिलाःकेशाःय-
स्याःसा कुटिलकेशी॥इतरेषांअंगादिवाचका-
नांस्त्रीत्वेऽपि आबंतत्वमेव ॥ चारुदेहा विस्तृ-
तालका आवृतकुचा कुंददशनेत्यादि ॥ उरु-
पृथुलघुबहुपटुऋजुस्वादुचारुमृदुशब्दानां स्त्री
लिंगविशेषणत्वे ईबंतत्वमपि ॥ यथा ॥ मृ-
द्वी शाटी लघ्वीभाषेत्यादि ॥ इति द्विपदबहु-
व्रीहिः ॥बहुपदो यथा ॥ अधिकःउन्नतःअंसो
यस्य सः अधिकोन्नतांसः ॥ सहपूर्वपदो य-
था ॥ सह कृष्णेन वर्तत इति सकृष्णः ॥ सह
पुत्रेणवर्तत इति सपुत्रः ॥ रामेण सह वर्तत
इति सरामः ॥ संख्योत्तरपदो यथा ॥ दशा-

नां समीपे ये संति ते उपदशाः ॥ संख्योभ-
यपदो यथा ॥ द्वौ वा त्रयो वा द्वित्राःव्यति-
हारलक्षणो यथा ॥ केशेषु केशेषु गृहीत्वा इदं
युद्धं प्रवर्तत इति केशाकेशि युद्धम् ॥ दंडैर्दंडैः
कृत्वा इदं युद्धं प्रवर्तत इतिदंडादंडियुद्धं ॥ दि-
गंतरालक्षणो यथा ॥ दक्षिणस्याःपूर्वस्या-
श्च दिशोर्यदंतरालं सा दक्षिणपूर्वा ॥ इति
बहुव्रीहिः ॥ अथ द्विगुः ॥ द्विगुसमासो द्विवि-
धः एकवद्भावी अनेकवद्भावी चेति ॥ एकव-
द्भावी द्विगुर्यथा ॥ त्रयाणां शृंगाणां समाहा-
रस्त्रिशृंगम् ॥ पंचानां फलानां समाहारः पं-
चफली ॥ अनेकवद्भावी द्विगुर्यथा ॥ सप्त च
ते ऋषयश्च सप्तर्षयः अथ द्वंद्वः ॥ द्वंद्वोऽपि
द्विविधः इतरेतरसमाहारभेदात् ॥ इतरेत-
रद्वंद्वो यथा ॥ प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रो-
धौ ॥ रामश्च कृष्णश्च रामकृष्णौ ॥ समाहार-

द्वंद्वो यथा ॥ हरिश्च हरश्च गुरुश्च एषां समाहारः हरिहरगुरुः ॥ प्राणितूर्यसेनांगानां द्वंद्वैकवद्भावः ॥ प्राण्यंगे यथा ॥ पाणी च पादौ च मुखं च पाणिपादमुखम् ॥ तूर्यांगे यथा ॥ मार्दंगिकश्च वैणविकश्च मार्दंगिकवैणविकम् ॥ शंखश्च पटहश्च शंखपटहम् ॥ सेनांगे यथा ॥ राजन्याश्च रथाश्च अश्वाश्च राजन्यरथाश्वम् ॥ इति द्वंद्वः ॥ अथाव्ययीभावः॥ स यथा ॥ तटं तटं प्रत्यनुतटम्॥गिरिंगिरिं प्रत्यनुगिरि ॥क्रममनतिक्रम्य वर्तत इति यथाक्रमम् ॥ वेलायामित्यधिवेलम् ॥ कुंभस्य समीपे वर्तत इत्युपकुंभम् ॥ मक्षिकाणामभावो निर्मक्षिकम् ॥ हिमस्य अत्ययःअतिहिमम् ॥ अव्ययीभावस्याव्ययत्वात्त्रिषु लिंगेषु समानं रूपम् ॥ इति षट्समासा निर्णीताः ॥ अथ

लुक्समासोऽलुक्समासश्च ॥ लुक्समासो यथा ॥ तनुरेव लता तनुलता ॥ कृष्णा एव मेघाः कृष्णमेघाः॥ अलुक्समासो यथा ॥ वने चरतीति वनेचरः ॥ पंके रोहतीति पंकेरुहम् ॥ मत्वर्थीयादयो यथा ॥ बुद्धिरस्यास्तीति बुद्धिमान्॥ धनमस्यास्तीति धनवान् ॥ धीरस्य भावो धीरता ॥ जनानां समूहोजनता ॥ घटस्य भावो घटत्वम् ॥ वृक्षशाखा तत्पुरुषः श्वेताश्वः कर्मधारयः ॥ रक्तवस्त्रो बहुव्रीहिर्द्वंद्वश्चंद्रदिवाकरौ ॥ १ ॥ यल्लिंगं यद्वचनं या च विभक्तिर्विशेष्यस्य ॥ तल्लिंगं तद्वचनं सैव विभक्तिर्विशेषणस्यापि ॥ ॥ २ ॥ सदृशं त्रिषु लिंगेषु सर्वासु च विभक्तिषु ॥ वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् ॥ ३ ॥ आदौ कर्तृपदं वाच्यं द्वितीयादिपदं ततः ॥ त्क्वातुमुन्ल्यप्च मध्ये तु कुर्यादंते

क्रियापदम् ॥ ४ ॥ अथ कारकमुच्यते ॥ कर्ता कर्म च करणं संप्रदानं तथैव च ॥ अपादानाधिकरणमित्याहुः कारकाणि षट् ॥ ५ ॥ निर्देशे प्रथमा प्रोक्ता सैव चामंत्रणेष्वपि ॥ द्वितीया कर्मणि प्रोक्ता तृतीया कर्तृकरणयोः ॥ ६ ॥ ज्ञानज्ञाप्यैंऽगविकारे हेतावपि च इष्यते ॥ तादर्थ्ये संप्रदाने च चतुर्थी स्याच्च सर्वदा ॥७॥ हेत्वपादानयोः पंचमी षष्ठी तु कर्तृकर्मसंबंधे ॥ अधिकरणनिमित्तेसति सप्तमी स्याच्च विषयेऽपि ॥८॥ यदा कर्तरि प्रथमा स्यात्कर्मणि द्वितीया तदा ॥ यदा कर्तरि तृतीया स्यात्कर्मणि प्रथमा तदा ॥ ९ ॥ विशेषणं पुरस्कृत्य विशेष्यं तदनंतरम् ॥ कर्तृकर्मक्रियायुक्तमेतदन्वयलक्षणम् ॥ १० ॥ प्रथमांतस्तृतीयांतः षष्ठ्यंतः कर्ता ॥ द्वितीयांतं

षष्ठ्यंतं कर्म ॥ तृतीयांतं करणम् ॥ चतुर्थ्यंतं संप्रदानम् ॥ पंचम्यंतमपादानम् ॥ षष्ठ्यर्थः संबंधः ॥ सप्तम्यंतमधिकरणम् ॥ इति कारकाणि ॥ तो ते ती त्या तें तीं ॥१॥ त्यातें त्यां तें त्याप्रत त्यांप्रत तीतें त्यांतें तीप्रत त्यांप्रत ॥२॥त्यानें त्याणें तेणें त्यांनीं त्यांणीं त्यांहीं तेणेंकरून त्यांकरून त्यांहींकरून त्याशीं त्यांशीं त्यासहवर्तमान त्यांसहवर्तमान त्यासह त्यांसह तिनें तिणें तीकरून तीणेंकरून त्यांकरून तिशीं त्यांशीं तीसह त्यांसह ॥३॥ त्याकारणें त्यांकारणें तीसाठीं त्यांसाठीं तदर्थ ॥४॥ त्यापासून त्यांपासून त्याहून त्यांहून त्यास्तव त्यांस्तव त्यापेक्षां त्यांपेक्षां तीपासून त्यांपासून तीहून त्यांहून तीस्तव त्यांस्तव तीपेक्षां त्यांपेक्षां ॥५॥ त्याचा त्यांचा त्यास त्यांस तिचा त्यांचा तीस

त्यांस ॥ ६ ॥ त्याचेठायीं त्यांचेठायीं त्याम-
ध्यें त्यांमध्यें त्यांच्यामध्यें त्याजमध्यें त्यां-
जमध्यें त्यांत त्यांच्यांत त्याविषयीं त्याच्या-
विषयीं त्याजविषयीं त्यांविषयीं त्यांच्यावि-
षयीं त्यांजविषयीं त्या निमित्त त्याच्यानिमि-
त्त त्याजनिमित्त त्यांनिमित्त त्यांजनिमित्त तो-
असतां ते असतां तिचेठायीं त्याचेठायीं ती
मध्यें तिच्यामध्यें तिजमध्यें त्यामध्यें त्यां-
च्यामध्यें त्यांजमध्यें तींत तिच्यांत त्यांत
त्यांच्यांत तीविषयीं तिच्याविषयीं तिजविष-
यीं त्यांविषयीं त्यांच्याविषयीं त्यांजविषयीं
तीनिमित्त तिच्यानिमित्त तिजनिमित्त त्यांनि
मित्त त्यांच्यानिमित्त त्यांजनिमित्त ती अस
तां ते असतां तीं असतां ॥७॥ हे अरे अगा
अहो हो भो हे अगे गे अहो हो भो हे ॥ सं
बोधनम् ॥ इतिसमासचक्रं समाप्तम् ॥

जाहिरात ।

नाम.	किं.	डा.	म.
सिद्धान्तचन्द्रिका सुबोधिनीटीका और तत्त्वदीपिकाटीकासे सहित	४		-॥-
सारस्वतचन्द्रकीर्तिटीकासहित	१		-।-
सिद्धांतकौमुदी अष्टाध्यायी, गणपाठ, धातुपाठ, लिङ्गानुशासन पाठ, अक्षर मोठा जिल्द अति उत्तम	२		-॥-
अष्टाध्यायी, सूत्रपाठ	४		१
लघुसिद्धांतकौमुदी टिप्पणसहित	४		१

सम्पूर्ण पाठको और विद्यानुरागी महाशयोंसे निवेदन है कि इस पुस्तकालयमें संस्कृत अथवा भाषाकी नीति काव्य नाटक उपन्यास वैद्यक वेदान्तादिकी पुस्तकें सर्वदा समयपर तैयार रहती हैं. जिनको आवश्यकता हो मंगावे यदि सूचीपत्र देखनेकी इच्छा हो तो निम्न लिखित ठिकाने परसे मंगवाना ।

हरिप्रसाद भगीरथजीका

पुस्तकालय—कालकादेवीरोड़ रामवाड़ी मुंबई.